मानाधिकरणस्यैवाभिन्नत्वाद्यभावस्यापिसाध्यव्यापकताघटकविषयितासंबंधेनयावद्धेत्वधिकरणेप्रतियोगिसमानाधिक
रणत्वात्।नचयेनयेनसंबंधेनव्यापकत्वंतेनैवसंबंधेनप्रतियोगिसामानाधिकरण्यविवक्षणात्नोक्तदोषः।तथासतिपावकत्वेप्य

त्रि॰टी॰मा॰
२०

नच५ २१

व्याप्तेः। विशेषणता सामान्येनैव साध्यवृत्तिनिरूपितविशेषणतयापि वाच्यत्वादेः साध्यव्यापकतया घटत्वादिना वाच्यत्वाद्यभावस्य व
ह्न्या संबंधेन हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहात् धूमवान् वह्नेरित्यादिव्याप्तिचरणापत्त्या प्रतिविरहादिति॥ त
न्मते॥ विषयितासंबंधेन व्यापकताया एवासत्वात्॥ विषयितासंबंधेन स्वावच्छिन्नाधिकरणताप्रसिध्या स्वावच्छिन्नानधिकरण
साध्यवन्निष्ठत्वादिव्यापकतायास्तेन संबंधेनासंभवात् तेन संबंधेन स्वावच्छिन्नसंबंधित्वमेव व्यापकतायां निवेशनीयं। तदुक्त
तिप्रसंगभयेनैव तस्यानिवेशनीयत्वात्। न च तत्संबंधावच्छिन्नायाः साध्यवन्निष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानव
च्छेदकधर्मवत्वलक्षणं व्यापकत्वं विषयितासंबंधेन सुलभं साध्यवतिनिष्ठत्वाभावे वस्तुमात्रस्यैव विषयितासंबंधेन संबंधित्वेपि नित्यज्ञा
नात्मत्वविशिष्टघटादेर्विषयितासंबंधेनाभावस्य तत्र सत्वेन बाधकाभावादिति वाच्यं॥ विषयितायाः वृत्त्यनियामकतया तत्संबंधावच्छि
न्नप्रतियोगित्वाप्रसिद्धेः। यदपि मनस्त्ववत् अणुत्वादिस्पर्शातिव्याप्तिः अणुत्वसामानाधिकरण्यमनस्त्वाद्यभावस्यापि साध्यव्या
पकताघटकादिकृतविशेषणतया सर्वत्रैव परमाणौ प्रतियोगिसमानाधिकरणत्वादिति॥ ॥तदपि तुच्छं॥ ॥नित्यानामव्यावर्त्तक
त्वात्॥ जन्यानामेव मूर्त्तानां दिगुपाधितया परमाणोः दिक्कृतविशेषणतया कस्याप्यसत्वात्तेनापि संबंधेन साध्यव्यापकत्वविरहात्।

राम॰
२०

अन्यथावस्तुमात्रस्यैव कालोपाधित्वसंभवात् तदपि जन्यमात्रस्य न स्यात्। अत एव प्रलयदशायां दिक्कालयोर्विभागो नास्तीति मेतः
त्यपि सिद्धांतः संगच्छते।। अन्यथा परमाणूनां सत्वात्तदानीमपि दिग्विभागप्रसंगादिति दिक्। यत्किंचिद्यदा महाकालवृत्ति
स्यात्तद्वत्तित्व्याप्तिः। साधनसमानाधिकरणस्य महाकाले न्यत्वाद्यभावस्यापि साध्यव्यापकताघटककालिकसंबंधेन महाकालप्र
तियोगिसमानाधिकरणत्वात्। नच स्पंदत्वस्याकारकयत्किंचिद्बोधव्यक्तेः विषयतासंबंधेनैव स्पंदत्वव्यापकत्वात्।। यावदंतर्गततद्दा स्य४
य५ वस्यैव साध्यव्यापकताघटकविषयतासंबंधेन हेत्वधिकरणे महाकाले प्रतियोगिसमानाधिकरणत्वाभावान्नातिव्याप्तिः। नहि ताद
शबोधव्यक्तेः कालिकसंबंधेनापि स्पंदत्वव्यापकत्वं भाविभूतस्पंदे व्यभिचारादिति वाच्यं।। विषयतायाः ज्ञानसमानकालीनतयात पु६
द्बुद्धिव्यक्तेरपि भाविदशायामेव स्पंदत्ववति विषयतासंबंधेन तद्बुद्धिव्यक्त्यभावसत्वात् विषयता[redacted]संबंधेन
स्पंदत्वस्याकारकजन्यबुद्धेः साध्यव्यापकत्वासंभवात्। किंच व्यधिकरणधर्मावच्छिन्नाभावस्यासत्वेपि व्यधिकरणसंबंधावच्छिन्न
२ धर्मता वाच्यत्वाभावमादायैव केवलान्वयिसाध्यकस्थले लक्षणसमन्वयात्। प्रतियोग्यवृत्तित्वस्यैवादिमूलस्य दूषकत्वानुपपत्तेः। नच
साध्यवन्निष्ठाभावीयप्रतियोगितायाः सामानाधिकर[redacted]णेनानवच्छेदकत्वरूपव्यापकतायां व्यधिकरण
त४ स्म४

धर्मावच्छिन्नाभावमादायासंभववारकस्य समानाधिकरणेनेत्यस्य अर्थतायामेव तन्मूलग्रंथस्य तात्पर्यमिति वाच्यं सामान्यधर्मेणाभि
न्नाभावमादाय अव्यापकत्वाप्रसिद्धिवारणार्थमेव सामानाधिकरण्यदलस्य व्यापकतायाम् अवश्यं निवेशनीयत्वात्। इत्यादिकं विभा
व्यते॥ तदसंबंधैक्यविवक्षेऽपि ग्रंथस्य साध्यव्यापकतावच्छेदकप्रतियोगित्वस्य प्रतियोगिसामानाधिकरण्यघटकीभूतप्रतियो ना३
ग्यधिकरणत्वस्य चैकसंबंधावच्छिन्नत्वविवक्षणेत्यर्थः॥ ॥तथा च॥ ॥स्वप्रतियोगितावच्छेदकसंबंधावच्छिन्नधर्मोऽसौ व्यापकताव
च्छेदकप्रतियोगिताकाः। यावंतोऽभावाः स्वप्रतियोगितावच्छेदकसंबंधेन प्रतियोगिसमानाधिकरणाः इत्यर्थलाभात्। यावदंतर्ग
स्पं तस्य समवायादिसंबंधेन नित्यज्ञानत्वमनस्त्वस्पंदत्वाद्यभावस्य प्रतियोगितावच्छेदकीभूतसमवायसंबंधेन यावद्धेत्वधिकरणे
प्रतियोग्यसमानाधिकरणत्वात्। नित्यज्ञाने नित्यसविषयकत्वात्॥ मनस्त्ववतोऽणुत्वात्। स्पंदो महाकालत्वादित्यादौ कुत्रापि ना
तिव्याप्तिः॥ न चैवं वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः॥ व्यधिकरणधर्मावच्छिन्नवाच्यत्वाद्यभावस्य तत्र घटकतया तस्य प्रतियोगिता
वच्छेदकसंबंधसत्त्वे मानाभावादिति वाच्यं। स्वरूपसंबंधेन घटत्वादिना वाच्यत्वं नास्तीत्यादिप्रतीत्यनुरोधेन तादृशाभावस्यापि राम॰
प्रतियोगितावच्छेदकसंबंधस्वीकारात्। अन्यथाभूतलं संयोगेन प्रसिध्यातः। व्यधिकरणधर्मावच्छिन्नोऽपि चेदभावः प्रामाणिकः। २१

१ पटत्वावच्छिन्नं घटत्वादिनेति विशिष्टप्रसत्वेपि भूतले संयोगेन पटत्वेन घटो नास्तीति प्रसत्प्रा १
१ संगतत्वैवम्

तदसंबंधैस्संबंधैस्तत्प्रतियोगितावच्छिन्नाभिति ग्रंथकृतैव सामान्याभावे वक्ष्यमाणत्वात्॥ ॥केचित्तु॥ ॥संबंधैश्च रूपविवक्षयेत्य
त्र साध्यवत्वं साध्यव्यापकत्वं प्रतियोगित्वं प्रतियोगिसामानाधिकरण्यघटकीभूतप्रतियोग्यधिकरणत्वं चैकेन साध्यतावच्छे
दकसंबंधेन विवक्षणीयं इत्यर्थः। तथा च साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यव्यापकतावच्छेदकीभूततादृशसंबंधावच्छिन्न
कुत्राप्यप्रसिद्ध्याऽव्याप्तिः। न च प्रतियोगितायाः साध्यतावच्छेदकसंबंधावच्छिन्नत्वविवक्षणं व्यर्थमिति वाच्यं। तदनुक्तौ वाच्यत्वादिमे
यमाद्यैवकेवलान्वय्यादौ लक्षणासंभवे प्रतियोग्यवृत्तित्वेत्यादिमूले तन्निराकरणस्यासांगत्यापत्तेः। न[illegible]वमपि सर्वत्र वाच्य
त्वाद्यभावस्येत्यग्रिमग्रंथविरोधः। वाच्यत्वादेः संयोगसंबंधेन धूमाद्यव्यापकत्वादिति वाच्यं। वाच्यत्वाद्यभावस्याप्रसि
द्धत्वात् यत्र स्वरूपसंबंधेन साध्यता तत्र वाच्यत्वाद्यभावमादाय संयोगादिसंबंधेन साध्यतायां च द्रव्यत्वाद्यभावमादायैवाति
व्याप्तिपरतयैव तत्संगतिरित्याहुः॥ ॥तन्मंदं॥ ॥मनोन्यत्वाद्यभावस्याप्रसिद्ध्यग्रंथविरोधात्। भूतत्वमूर्तत्वोभयस्य समवायेन साध्य
तायां मनोन्यत्वस्य तत्संबंधेन साध्यव्यापकत्वासंभवात्। वृत्त्यनियामकसंबंधेनाधिकरणत्वस्य प्रतियोगित्वस्य चाप्रसिद्ध्या तेन

चै ५

वो ६

दि ४

शि॰टी॰जा॰
२२

संबंधेन साध्यतापर्याप्ती चेत्वाद्यादित्यादिरसंभेतावच्छासस्यापत्तेः। तद्रूपान्यत्वेपरूपत्वात इत्यादाववतिव्याप्त्यापत्तेश्च। साध्यताघटकसमवा
यसंबंधेन साध्यव्यापकतावच्छेदकप्रतियोगिताकान्योन्याधिकरणधर्मावच्छिन्नगुणत्वाद्यभावानां सर्वेषामेव स्वविशिष्टहेत्वधिक
रणावच्छेदेन प्रतियोगिसामानाधिकरण्यादिति। यत्तु विशेषणतात्विशेषणसाध्यव्यापकत्वं तेनैव प्रतियोगित्वं प्रतियोगिसामा च
नाधिकरण्यं च संबंधैक्यविवक्षयैवसस्यार्थमाह। तद्विग्वाधभावस्मान्तत्वाद्यभावस्यैत्यादिद्वंद्वस्याव्याप्यकतापत्तेरूपे क्षितमिति
नन्वेतावतापि पश्यमान्यताना इत्यादावव्याप्तिरेव। घटत्वादिना कल्वसामान्याभावस्यापि स्वविशिष्टस्य हेतौ विषयत्वपान्याधिकरणो
घटादौ व्यापकताघटकसमवायेन प्रतियोगिसामानाधिकरण्याभावादत आह दलांतरेति। पश्चादुक्तहेत्वधिकरणावच्छेदेनेत्यत्र हेत्वधि
करणात्वेपीत्यर्थः। संबंधभेदनिबंधनोदोषः एकसंबंधेन हेत्वधिकरणत्वे स्वविशिष्टहेत्वधिकरणो [redacted]: [redacted] सत्वान्यसंबंधेन हेत्वधिक
रणात्वनिबंधनो दोषः एकसंबंधेन हेत्वधिकरणत्वे स्वविशिष्टः व्याप्तिरूपो दोषः इत्यर्थः। संबंधैक्यविवक्षयेति। हेतुसमानाधिकरणात्वस्यत्रहे व३
त्वधिकरणत्वं येन संबंधेन स्वविशिष्टहेत्वधिकरणावच्छेदेनेत्यत्र हेत्वधिकरणत्वं तेनैव संबंधेनेति विवक्षयेत्यर्थः। दृष्टांतवदलांतरपदमपि नि२ राम॰
साधुसंगच्छतइति तु नव्याः। यद्वा धूमवान्वह्नेरित्यत्रातिव्याप्तिः धूमसामान्याभावस्यापि हेत्वधिकरणपर्वतगोलकावच्छेदेन स्वप्रति २२

हेत्वधिकरणदलस्य तेनान्य संबंधेन हेत्वधिकरणत्वनिबंधनो ३
पं २

योगित्वस्य कालिकसंबंधेनाश्रयीभूतवत्त्यादेः समानाधिकरणत्वादतस्त्राह दलांतरेणेति। प्रतियोगिसामानाधिकरण्यमित्यत्र
प्रतियोगिताश्रयपदलिपीत्यर्थः। संबंधभेदेन निबंधनो दोषः प्रकृतसाध्यव्यापकत्वस्य एकसंबंधावच्छिन्नावच्छेदकं प्रतियोगिता ताक
काभावस्यान्यसंबंधावच्छिन्नप्रतियोगिताश्रयीभूतवह्न्यादेः सामानाधिकरण्यनिबंधनो दोषः संबंधैक्यविवक्षया। यत्संबं
प्रतियोगि धेन व्यापकतावच्छेदकत्वं प्रतियोगित्वस्य सामानाधिकरण्यमित्यत्रापि तेन संबंधेन प्रतियोगिनाश्रयत्वविवक्षया इत्यर्थ इति संदे
पः॥ ॥अत्र संबंधैक्यविवक्षायां रूपसामान्याभाववान् पृथिवीत्वात् जन्यपृथिवीत्वादेत्यादि विरुद्धहेतावतिव्याप्तिः। साधनसमानाधि प
करणास्य पृथिव्यन्यत्वा[illegible]भावस्यापि हेत्वधिकरणपृथिव्यवच्छेदेन जन्यपृथिव्यवच्छेदेन वा दिक्कृतविशेषणतया प्रतियोगिसमानाधि
करणत्वात्। मूर्त्तमात्रस्यैव दिगुपाधित्वोपगमात्। न चैतस्याल्लस्यैव निरूपमित्याकारकयत्किंचिल्लमात्म्यक्तो विषयतासंबंधेन सा
ध्यव्यापकत्वात् यावदंतर्गततदभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः। तादृशबुद्धि
व्यक्तेः भिन्नकालीनघटादौ केनापि संबंधेनासत्त्वादिति वाच्यं विषयतया ज्ञानस्य मोक्षकालीनत्वानाद्रात्वभावदशायामेव रूप
सामान्यगगनादौ विषयतासंबंधेन तद्बुद्ध्यभावप्रतियोगित्वावच्छिन्नाभावसत्त्वात्तादृशज्ञानव्यक्त्यभावस्य साध्यव्यापकतावच्छेदकप्र

त्मा३ त्व त२

त्रि·टी·जा· तियोगिताकत्वाभावात्। स्वावच्छिन्नानधिकरणस्य साध्यवन्निष्ठस्यादिव्यापकतापत्तेर्नु विश्वैको सत्वेपि प्रतियोगिवैयधिकरण्य घटित
२३ व्यापकत्वस्य तद्व्यक्तिव्यक्षाव सत्वेनोक्तस्थले ऽतिव्याप्तेरावश्यकत्वादित्यभिमानं निरस्यति। रूपसामान्याभावेत्यादिना पृथिवीत्वादि
कमिति॥ नित्यरूपवत्यः दिगुपाधित्वे मानाभावादादिपदं। तेनजन्यरूपवत्पृथिवी घुपग्रहः। सर्वेषु तुल्यं प्रतिकूलंविरोधं निरस्यति त्वा३
॥प्रलयइति। महाप्रलय इत्यर्थः। खंडप्रलये तु पार्थिवपरमाणोरूपसत्वेन अन्यथा उत्तरसर्गे पार्थिवद्व्यणुकस्यरूपोत्पत्त्यर्थं प
रमाणौ। पाकांतरकल्पनापत्तेरिति भावः॥ ॥प्रलयइत्यस्य पाकेन रूपादेः प्रलयपदस्योपमित्यर्थः। तेन महाप्रलयानभ्युपग
मेपि न क्षतिः। उत्पत्तिकाले चेत्यत्र चकारेणानिरुक्तप्रलयस्यानुकर्षणात्। अवयविनिष्पिपाकदशायां तत्सत्वेनपानत्रैथम् प्य६
नतेत्यपरे॥ ननु विशेषविरहेपि घटाद्यवच्छेदेन व्यभिचारित्वात्कुतः। सत्येन तुल्यमतेआह॥ उत्पत्तीति। यद्यपि पिंडादिरूपनाशाका पाकेन०
लेपि अवयविनि रूपसामान्याभावसत्वे। तथापि पीलुपाकवादिमते तदसंभवात् अपच्यमानावयव्यनुरोधाच्च उत्पत्तिकालमात्रा
नुसरणं। तत्सत्वादिति। रूपादिसामान्याभावसत्वादित्यर्थः। प्रतियोगिवदिति। प्रतियोगिन द्रव्यस्येत्यर्थः। विरोधित्वं च एकदा एककालस्थाव रुप·
त्वं॥ मानाभावादिति। प्रलयाद्यवच्छेदेन परमाण्वादौ रूपादिसामान्याभावे तु प्रयोजनं निकर्षाभावात् तस्य तत्संभवेपि अनुमा ४३

नादिकमेवमानमस्तीत्याशयः। यत्तु घटादौ उत्पत्तिकालावच्छेदेन रूपसामान्याभावस्य प्रत्यक्षमेव संभवति तदानीं चक्षुः संयुक्तवि
शेषणतायास्तत्रासत्वेपि द्रव्यसमवेतवृत्त्यभावप्रत्यक्षे हेतोश्चक्षुःसंयुक्तसमवेतविशेषणतायाः सत्वेन सन्निकर्षसंभवादि
ति॥ ॥तत्तुच्छं॥ ॥चक्षुःसंयुक्तसमवेतद्व्यणुकविशेषणतया रूपाद्यभावचाक्षुषापत्त्याच चक्षुःसंयुक्तयोग्यसमवेतविशे
षणताया एव अभावग्राहकत्वेन द्रव्यान्यद्रव्यसमवेतवृत्त्यभावचाक्षुषत्वस्यैव तज्जन्यतावच्छेदकत्वात्। अन्यथा त्रसरेणु
वृत्त्यभावचाक्षुषे व्यभिचारापत्तेः। विशेष्यं॥ वस्तुतः स्वोत्पत्तेः पूर्वं च चक्षुःसंयुक्तसमवेतस्य घटादेरसत्वात् विशेषणता
याश्च अपि तदानीमसत्वात् तदुक्तक्रमेणाहेतुत्वेन नास्तीति ध्येयं॥ अत एवेति। ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वेमा
नाभावादित्यर्थः। रक्तिमध्वंसप्रागभावयोः सत्वमविरोधेपि तु मतान्तरापत्तेः॥ रक्तं रूपमिति। न च गुरोः शुक्लादृतः शुक्लमित्यनुशास
नात् रक्ते रूपं नास्तीत्येव प्रयोगोपयुक्त इति वाच्यं। वस्तुतः एवविशेषणानां प्रन्नत्वस्यैवमुक्तादिशा त्वस्य पुंस्त्वानुशासनात्। अत एव
शुक्लं रूपमिति प्रयोगः समासे मत्वर्थीयाकृतेवव स्यात् इति ध्येयं। एष अनेके रूपं नास्तीत्याकारकः प्रत्ययः पूर्वं स्यादित्यादि। पूर्वोक्तस्य ध्वंसस्व
ति उत्तरक्तस्य प्रागभाववति इदानीं रक्तोपीत्यर्थः। न चैव रक्तत्वादन्यायां वर्तमानस्यापि रक्तान्तरध्वंसस्य इदानीं रक्तत्वावच्छिन्नप्रतियो

प्री॰टी॰गा॰
२५

गिताकत्वविरहात्ममतादृशप्रत्ययः। तस्यक्ष्यव्याप्यवृत्तित्वादितिवाच्यं। ध्वंसादिप्रतियोगित्वस्यापि किंचित्स्यमपि नवच्छेद्यत्वात् तत्तद्वंतध्वं
समयाग्राभावादिषु रक्तत्वावच्छिन्नप्रतियोगिताकत्वकल्पनापेक्षया रक्तत्वावच्छिन्नध्वंसात्यंताभावसंबंधस्यैव क्ष्यंतरात्यामादिषु क
ल्पनौलघुत्वात्॥ नचयावंतिरक्तरूपाणितत्तच्छ्यामिकेवेतरधर्मानवच्छिन्नतत्तच्छ्यामिनिष्ठप्रतियोगिताकाभावैरेवरक्तंरूपंना
स्तीतिप्रत्ययःक्रियते। प्रकृतेतु विद्यमानरूपप्रतियोगिकस्य तादृशाभावस्यासत्वान्नतथाप्रतीतिरितिवाच्यं। तथासत्यंत
रात्यामे रक्तंरूपंनास्तीत्याकारकं वनिर्णयेपितत्र रक्तंरूपमस्तीतिप्रत्ययापत्तेः॥ विशेषितः सामान्याभावस्यानिश्चयात्॥ विशे
षाभावकूटनिर्णयस्याप्रतिबंधकत्वात्। अन्यथासामान्याभावएवनसिध्येदितिभावः॥ ॥प्रांच॰रक्त॥ ॥प्रतियोगितासंबंधेन
रूपत्वमात्रावच्छिन्नप्रकारताकः संसर्गाभावविशेष्यकः प्रत्यययोरूपाद्यवच्छिन्नप्रकारताकबुद्धेर्विरोधी। तिरूपत्वंप्रतियोगिता २
वच्छेदकमेवनेतिश्यामतादृशाभावोरूपत्वावच्छिन्नाभावएवरूपंनास्तीतिप्रतीतेर्नविषयः किंमनुरोधेनरूपध्वंसादिमतितदत्यं राम॰
ताभावसिद्धिरित्याह॥ ॥अवयवीतरक्त्यामेसमवायेनरक्तंरूपंनास्तीतिप्रतीतेः [redacted]ः सामाण्यानुरोधेनैवध्वंसात्यं २५
ताभावयोर्नविरोधः। अन्यथासमवायावच्छिन्नप्रतियोगिताकध्वंसाद्यप्रसिद्ध्यात्मतात्मनीतेर्भ्रमत्वापत्तेरितितुपरमार्थः। तत्रा

लो४

एयानावेपिवह्निमान् धूमादित्यादौ नाव्याप्तिः स्वाद्यंविशिष्टस्वादिना दौ घटत्वादिमाद्यमत्वाद्यभावस्य हेत्वधिकरण ४

मानाधिकरण्यंपंचेति। प्रतियोगिसामानाधिकरण्यंपंचेत्यर्थः स्वविशिष्टेति। स्वपदं लक्षणघटकतत्तदभावव्यक्तिपरं। तथा च तत्तदभावा
श्रयीभूतंपक्षेतु तादात्म्यसंबंधेन [redacted] हेतुतावच्छेदकावच्छिन्नाधिकरणांतर्वर्त्तित्वेन तत्तदभावविशेषस्वप्रतियोगिसामानाधिकरण्यप
श्चाद्यमित्यर्थः। तेन हेतुसमानाधिकरणस्य घटत्वादिनावच्छिन्नाद्यभावस्य कालिकसंबंधेन धूमाद्यधिकरणस्पंदते व्यापकतावा दि३
टकसंयोगादिसंबंधेन प्रतियोगिसामानाधिकरण्यगुणाद्यवच्छेदेन प्रतियोगिसमानाधिकरणत्वेपि क्षतिः। गुणादीनां विशिष्ट
सत्तानधिकरणत्वात्। यद्यपि व्याप्यवृत्तेरवच्छेदकत्वमानाभावात्। वाच्यत्वाद्यभावनिष्ठं यत्प्रतियोगिसामानाधिकरण्यं तदव
च्छेदकत्वं नहेत्वधिकरणस्याप्यसंभवः। कथितातिव्याप्तितादवस्थ्यं च न च स्वविशिष्टहेत्वधिकरणता व्यापकीभूतप्रतियोग्यधिक पो६
रणतावच्छिन्नत्वंवाच्यं स्वाविशिष्टपदवैयर्थ्यापत्तेः। प्रतियोग्यधिकरणीभूतस्वविशिष्टं यावत्हेत्वधिकरणवृत्तित्वस्यैकोचद
व्यंतत्वादिसाध्यकेऽव्याप्तिः। यावद्धेत्वधिकरणाप्रसिद्धेः। तथापि यावत्तोहेतुमद्वृत्तिधर्माः हेत्वधिकरणतानिवाच्यावं तितत्प्र
तियोगिकाश्रयीभूतप्रतियोग्यधिकरणवृत्तित्वस्य विवक्षितत्वाददोषः। एकमात्रवृत्तिहेतोरपि तत्तद्व्यक्तिवृत्तित्वविशिष्टस्यब
त्यधिकरणतानिसंतीतिनतत्राव्याप्तिः। न च प्रतियोग्यधिकरणवृत्तित्वविशिष्टयावद्धेत्वधिकरणताकत्वमात्रं सम्यक्। स्वविशि

हेतुसमानाधिकरणात्यन्त॰

रितिभावः

त्रि॰टी॰त्रा॰ देतस्यैवचैवैयर्थ्यापत्तेः॥ प्रागुक्तमपिस्वविशिष्टप्रतियोग्यहेत्वधिकरणावच्छेदेनेत्यस्यप्रवेशस्यसार्थवत्त्वतीत्यतः पश्चादुक्तस्यापि
२५ हेतुसमानाधिकरणाद्यत्यस्य+ तस्यप्रथमंप्रयोजनमाह। तेनेति॥ गोत्वादिनागवाद्यभावस्यतद्वृत्तिकालेवृत्तावपियद्यगोत्वंत
द दागोरित्यादौनातिप्रसंगइतियोजना॥ ॥इदमुपलक्षणं॥ तत्तत्प्रयोगलकाम्यत्वा॰भावस्यापिकालेप्रतियोगिसामाना घ ३
धिकरणत्वात्। धूमवान्वह्नेरित्यादावतिप्रसंगोद्रष्टव्यः। गवाद्यभावस्यप्रतियोग्यधिकरणोदेशेकालेचधेनापि॰त्वमुपपादयतुमा मिर
माह। गवाद्यनधिकरणेति। इदानींचत्वरेगौर्नास्तीतिप्रत्ययात्गोमत्यपिकालेकालिकसंबंधावच्छिन्नगवाद्यभावस्यगवानधिकर
णचत्वरावच्छेदेनसत्त्वेननविरोधः। नचएतत्कालपक्षचत्वरएवएतत्कालावच्छेदेनगवात्यन्ताभावोविषयइतिवाच्यं। देशावच्छे
कालस्यैवकालवृत्तौदेशस्यावच्छेदकत्वानुभवात्। एतदुपक्षस्यकर्तुमशक्यत्वात्॥ इदानींगगनेगौर्नास्तीतिप्रतीतेर्गवाभावस्ये देशा ७
तत्कालावच्छेदेनगगनवृत्तित्वाद्गगनाहृत्यांअप्रसक्त्वापत्तेश्च। गवाद्यभावस्यगगनोदेशावच्छेदकत्वेनव्याप्यवृत्तितयाकालावच्छेद दि॰१
त्वासंभवादितिभावः। तद्वृत्तीति॥ गवादिमत्त्वस्यार्थः। कालेजन्यकाले॥ ॰॰ चरमध्वंसात्मकस्यप्रलयाभावाभावस्यापिप्रागभावंत ननु॰ २५
गतित्वात्तस्यमहाकालेप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरतआह। महाकालेचेति॥ तथाचतस्यापिमहाकालेप्र

चरमध्वंसःप्रलयः

तियोगिसामानाधिकरण्यं तस्य कालिकसंबंधेन जगदाधारत्वादिति भावः। ननु गोत्वादिजातेः प्रलये कालिकसंबंधेन सत्वे प्रमाणा
भावात् यदा गोत्वं तदा गौरिति सद्धेतुरेवतिर्यदि ब्रूयात्। तदाप्याह। यत्र कालत्वमिति। उक्तविवक्षाना देव घटादिसाधारण्ये
ण्यापि गोः साध्यतायामतिव्याप्तिरित्याशयेन साध्यांतरमाह॥ जन्यद्रव्यमिति। द्रव्यस्य साध्यतायां कालत्वं सद्धेतुरेव प्र
लयेपि कालिकसंबंधेन परमाण्वादेः सत्वात्। कार्यद्रव्यानधिकरणीभूतत्वे सति द्रव्यत्ववत्वेनैव धर्मिग्राहकप्रमाणेन तत्सिद्धेर व
तो व्यभिचारित्वसंपत्तये जन्यपदं। ननु महाप्रलयानंगीकारे प्रागुक्तं हेतुद्वयं लक्ष्यं एवं प्रलयेपि ब्रह्मांडांतरे जन्यद्रव्यसत्वा रेव५
त्। अतः साध्यांतरमाह। प्रलयावृत्तिर्वेति। खंडप्रलयावृत्तिर्वेत्यर्थः। यद्यपि प्रतियोगिनो यदधिकरणं तदवच्छिन्नत्वस्य दैशिक
विशेषणतासंबंधेन विवक्षायामपि यदा गोत्वं तदा गौरित्यादावतिव्याप्तिवारणासंभवात् प्रलयावृत्तित्वावच्छिन्नाभावस्य
पो८ प्रतियोग्यधिकरणे महाकालादौ दैशिकसंबंधेन वृत्तित्वविरहात्॥ न च द्रव्यं महाकालत्वादित्यादावव्याप्तिः। कालिकसंबंधेन महा
कालनिष्ठस्य द्रव्यत्वाद्यभावस्य स्वप्रतियोग्यधिकरणे दैशिकविशेषणतयाऽसंभवादिति वाच्यं। हेतुसमानाधिकरणत्वस्यापि
तादृशविशेषणतया विशेषणीयत्वात्। तथापि रूपभिन्नं गुणत्वादित्यादौ साधनसमानाधिकरणस्य रूपान्यत्वाद्यभावस्य

मत्कृतेत्वधिकरणे विशेषणतया वर्तमानानां निरूक्तयावन्दभावानां प्रतियोगितावच्छिन्नमेव विशेषणता संबंधेनो चितं प्रतियोग्यधिकरणवृत्तित्वमवच्छेदेपिगौरवात् सर्वत्र व्य ५
भिचारस्थलानन्वयाद्यभावमादायातिव्याप्त्यसंभवादिति तन्तुच्छं स्ववृत्तित्वविशिष्टानां केवलान्वयिधर्माणामत्यंताभावस्य स्वप्रतियोग्यवृत्तित्वेनासंभवापत्तेः न हि वा ५
५ न्वयादिवृत्तित्वविशिष्टानां वाच्यत्वादीनां

शि॰टी॰ता॰ २६ पभिन्नत्वप्रकारकप्रमाविशेष्यत्वा[redacted]भावस्य च रूपत्वादिस्वरूपतयापातस्यैदैशिकविशेषणतया व्यभि
त्वविरहेणाधावृत्तेरनतर्गतत्वात् घटत्वादिना समभिन्नत्वाद्यभावस्य च सर्वस्यैवतादृशाभावस्य महाकालादौ स्वप्रतियोगिसमा
नाधिकरणत्वात् अतिव्याप्तिरतः स्वविशिष्टेत्वधिकरणेत्यादि विवक्षानुसरणमिति वदंति तन्न रूपभेदाभावेऽतिव्याप्तिवा
४ व रणे केवलान्वयि देशिकविशेषणता घटितस्य लक्षणांतरस्यादेकेनापरस्यापकर्तुमशक्यत्वात् उभयोरेव लक्षणत्वेन वैयर्थ्यमिति
५ समार्थः यो। [redacted]भावो वाच्यत्वादिरूपप्रतियोगिवृत्तित्वेति रिक्तः॥ प्रचां मते संयोगसामान्याभाव साध्यकं प्रमेयत्वं
व्य एव व्यभिचारि स्यात् अपि पदं। प्रतियोगिवैय्यधिकरण्य घटितमेव साध्यव्यापकत्वमत्र मवेशितं॥ यथा सन्निवेशे वैय्यर्थ्यवि
८ रहादनस्तैवच्छेदकतं संयोगाभावनिष्ठप्रतियोगित्वैय्यर्थ्यस्तमित्याशयेन संयोगात्यंताभावस्याभिधानं तद्घटितसाध्यव्यापक
तायाः प्रवेशे तु गगनत्वादिविशिष्टवाच्यत्वाद्यभावविरहे त्वधिकरणे विशेषणतया वर्तमानानां निरुक्तयावदभावानां प्रतियो
गिवृत्तित्वमेव विशेषणतासंबंधेनोचितं प्रतियोग्यधिकरणवृत्तित्वमवच्छेदेपि गौरवात् सर्वत्र व्यभिचारिस्थलानन्वयाद्यभावमादा राम॰
यातिव्याप्त्यभावादिति तन्तुच्छं। स्ववृत्तित्वविशिष्टानां केवलान्वयिधर्माणामत्यंताभावस्य स्वप्रतियोग्यवृत्तित्वेनासंभवापत्तेः न हि २६

स्यगगनत्ववाच्यत्वोभयाभावादेर्वं।

~~वाच्यत्वादिविशिष्टाभावविशिष्टाभावंवाच्यत्वाभावीयमं~~ स्यावदंतर्गतस्वात्तस्य च हेत्वधिकरणीभूतगगनावच्छेदेन प्रतियोगिसमाना
धिकरणत्वादत्राप्यतिव्याप्तिरतःस्वविशिष्टपदं। एतदभिप्रायेणैवसंयोगाद्यात्मकाभावस्यत्रादिपदमुपात्तं। वस्तुतः सत्तावान् द्रव्यत्वा
त्गुणत्ववान् रूपत्वादित्यादौ कालेजन्यरूपे च हेतुसमानाधिकरणस्य सत्ताभावस्य गुणत्वसामान्याभावस्य च केनापि
पं०४ संबंधेनात्मगगनादौ नित्यरूपे चावृत्तित्वात् हेत्वधिकरणावच्छेदेन तस्यैव यावदंतर्गतस्य प्रतियोगिसामानाधिकरण्यवि
उ०५ रहात् अव्याप्तिस्स्यात्स्यादितिस्वविशिष्टपदं न स्यादित्यादिकं।। ।।ननु धूमाद्यभाववान्निष्ठोजलादिह्रदत्वविशिष्टस्य गोत्वाद्यभावस्या
भावो धूमाद्यभावरूपत्वाभावप्रतियोगिकस्याभावाधिकरणकस्याभावस्याधिकरणस्वरूपत्वात्।। तथा च धूमादौ साध्ये वह्न्या
दिहेतावतिव्याप्तिः धूमाद्यभावस्य हेत्वधिकरणावच्छेदेन गोत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वादत आह ज
लादिवृत्तीति। न च तादृशाभावस्य धूमाभावस्वरूपत्वेऽपि जलादौ न तादृशाभाव[illegible]त्वावच्छिन्नाधिकरणत्वं किंतु धूमाभावत्वाव
च्छिन्नाधिकरणत्वमेवेति न तस्य व्याप्तिप्रसंग इति वाच्यं।। एवं सत्यभावमात्रस्यैव प्रायेणाभेदप्रसंगात् उक्तक्रमेणातिप्रसंगस्यवा गा
रणासंभवादितिभावः। ननु तथापि धूमवान्वह्नेरित्यादावतिव्याप्तिः। समनियताभावानामैक्यात् धूमाभावस्य वह्निधूमोभयाभा

त्रि॰टी॰जा॰ भावत्स्तिन्नसंयोगोलकान्यत्वाभावादि संयोगोलकभेदत्वादिनाभेदसामान्याभावात् । अभिन्नसाध्यहेत्वधिकरणावच्छेदेनै
२७ वचन्यादिभेदात्मकप्रतियोगिसमानाधिकरणत्वादिति चेत् ॥ ॥ अत्राङ्कः ॥ ॥ यावत्सदस्यफलत्वेनः प्रतियोगितावच्छेदका
दकी॰ त्वेन साध्यव्यापकतावच्छेदकीभूतयत्प्रतियोगिकाभावत्वस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन तत्प्रतियोगिताश्रय
सामानाधिकरण्यं विवक्षितं ॥ तथा च धूमादिसामान्याभावस्य धूमादिनिष्ठतादृशप्रतियोगिताकस्य धूमादिनिष्ठप्रतियो
गिताश्रयेण धूमादिना हेत्वधिकरणावच्छेदेन तत्प्रतियोगिसामानाधिकरण्यविरहान्नातिव्याप्तिः ॥ न चैवं यत्समानाधिक
रणात्यन्ताभावप्रतियोगित्वमिति वाच्यं । आत्मत्वसामान्याभावीयप्रतियोगिताया अपि साध्यव्यापकतावच्छेदकत्वात् प्रतियो
गिताकस्यात्मत्वसामान्याभावस्य तादृशप्रतियोगिताश्रयसामानाधिकरण्यविरहाद्यमात्माज्ञानादित्यादावव्याप्तिवारक
त्वात् जलादिरहितत्वविशिष्टस्यादिग्रंथस्तु वस्तुगतिमनुरुध्यैवोक्तः ॥ तेन तादृशाभावस्य धूमाभावस्वरूपत्वेपि तस्य हेत्वधिकरणा
वच्छेदेन साध्यव्यापकतावच्छेदकीभूतधूमनिष्ठप्रतियोगिताश्रयसामानाधिकरण्यविरहादेवातिव्याप्त्यसंभवे विनासंगतिः ॥ न राम॰
च धूमत्वेन धूमाभावस्य धूमनिष्ठयत्प्रतियोगित्वं तदेव धूमत्वेन प्रमेयसामान्याभावस्य प्रमेयसामान्यनिष्ठप्रतियोगित्वं नाधिका २७

यत्तया २

१ संबंधो [illegible]कायाः प्रतियोगितायाः सामान्याक्तावस्थ ले विप्रतियोगिकेदे नैकस्मिन्नत्वादिति सांप्रदायिकाः ॥ वस्तुतः १

तानतुतस्मिन्नंप्रतियोगित्वांतरं ॥ गौरवादित्युक्तत्वविवक्षणापत्यप्रतीकारादिति वाच्यं स्वरूप साध्यव्यापकतावच्छेदिकायाः स्वन्युन
पा॰ वृत्तिधर्मानवच्छिन्नायाः स्वप्रतियोगितायाः निरूपकोभावकत्वस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन तादृशप्रतियोगिताश्रयसामा
नाधिकरण्यमेव वक्तव्यं ॥ तथाच धुमादिसामान्याभावस्य धुमत्वादिना प्रमेयसामान्याभावानतिरेकेपि तदीयंप्रमेयसामान्यनि
ष्ठप्रतियोगित्वं स्वन्युनवृत्तिनैव धुमत्वादिधर्मेणावच्छिन्नमतो न तादृशप्रतियोगिताश्रयसामानाधिकरण्यंप्रमुपादायातिप्रस
५ति गहूँकत्तमुप स्थामः ॥ ॥ यत्तु समनियताभावैक्यमते धुमवान्वन्हेरित्यादावतिव्याप्तिवारणार्थं येन येन संबंधेन साध्यव्यापक
तात्वेन तेन संबंधेन प्रत्येकंप्रतियोगिसामानाधिकरण्यंविवक्षितं ॥ तथाच व्यभिचारिमात्र एव यत्राधिकरणेव्यभिचारस्तदन्य
वि त्वस्य स्वात्मकत्वरूपसंबंधेनसाध्यव्यापकत्वात्तदभावस्य हेत्वधिकरणावच्छेदेन तादृशान्यत्वस्वरूपसंबंधेन स्वप्रतियोगिसा रूप १
मानाधिकरण्याभावान्नातिव्याप्तिः ॥ अत एवावृत्तितासंबंधस्य व्यापकताघटकत्वेपि नित्यज्ञानं नित्यस्वविषयकत्वात्तदभावो
९ तिया नाप्तिः ॥ ॥ नित्यज्ञानत्वाद्यभावस्य व्यापकताघटकीभूतेन समवायसंबंधेनैव प्रतियोग्यसमानाधिकरणत्वादितिमतं तु तुच्छं ॥ ॥ त २
घटत्वादिनावाच्यत्वाद्यभावस्येव घटत्वादिना यः पिंडान्यत्वाभावस्वरूपतयातस्यचव्यापकताघटकेनायः पिंडान्यत्वनिरूपितस्व

च

रूपसंबंधेनयावत्स्वेत्वधिकरणेप्रतियोगिसामानाधिकरण्यविरहादेवधूमवान्वह्नेरित्यादावतिव्याप्तिविरहात्।यावत्त्वंयस्यस्वविशिष्ट
इत्यस्यचसमानाधिकरणान्तस्यचव्यर्थतापातादितिदिक्॥ ॥ननुव्यधिकरणधर्मावच्छिन्नाभावास्तत्वेपिसर्वत्रसत्वेनैवघट
त्वविशिष्टवाच्यत्वाभावेगगनत्ववाच्यत्वोभयाभावेवासमानाधिकरण्योक्तलक्षणासंभवात्।प्रतियोगिपरितिश्चेत्पारिमुलावत्तानुपप
त्तिः।नचवैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नत्वेनव्यापकतावच्छेदकीभूतप्रतियोगितायाविशेषणीयत्वान्नैवमितिवाच्यं।व्य
भिचारावारकत्वेनतादृशविशेषणस्यव्यर्थत्वात्।अन्यथाव्यधिकरणधर्मावच्छिन्नाभावकालीनत्वेनहेतुविशेष्यैवव्यर्थाकरणं। न
म८ कुतोनसमर्थयेत्॥अतोलक्षणांतरमाह॥यत्समानाधिकरणानामित्यादिना॥ ॥वह्निमान्धूमात्सत्तावान्द्रव्यत्वादित्यादा
वव्याप्तिः।साध्यव्यापकप्रतियोगितोकानांजलत्वविशिष्टद्रव्यत्वाभावघटत्वविशिष्टसत्ताद्यभावानांस्वविशिष्टहेत्वधिकरणाव
च्छेदेनप्रतियोगितावच्छेदकीभूतजलत्वविशिष्टद्रव्यत्वत्वाद्यवच्छिन्नसामानाधिकरण्याभावात्।अतउक्तंरूपावच्छिन्नेति।तथाचज व्यापकतावच्छेदक
लत्वविशिष्टद्रव्यत्वत्वादेःसाध्यव्यापकतानवच्छेदकत्वाददोषः।यत्तुसाध्यव्यापकप्रतियोगि[illegible]कस्यघटत्वेनवत्वाद्यभावस्यया राम
वत्त्वेत्वधिकरणेघटत्वाद्यवच्छिन्नसामानाधिकरण्याभावाद्व्यापकतावच्छेदकरूपावच्छिन्नेति।तदत्यंतमसत्॥ ॥घटत्वेनवत्वाभा २८

वत्त्येव वह्नित्वेन घटाभाववत्पातस्यापि पावके हेतुमति स्वप्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्नसामानाधिकरण्यात्तानुसमवापि
त्वस्य वाच्यत्वव्यापकतानवच्छेदकत्वात्। तदवच्छिन्नवाच्यत्वाभाववस्य मूलोक्तस्येतल्लक्षणाघटकत्वादाह। ज्ञेयत्वत्वादिनेति। शेषमित्य
हि येन संबंधेन हेतुः तेन संबंधेन हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणवृत्तित्वं प्रभावेश्यात्। यो नेनाप्यमात्मात्ज्ञानानात् घटाभावत्वेमतिव्याप्त
घटसंयोगादेस्सादावात्मत्वसामान्याभावस्यातथात्वेपि नाव्याप्तिः। एवं येन संबंधेन व्यापकता तत्संबंधावच्छिन्नप्रतियोगिताका
भावस्य स्वप्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं बोध्यं॥ अतोन व्यधिकरणधर्मावच्छिन्ना
भावस्यासत्वेपि व्यधिकरणसंबंधावच्छिन्नवाच्यत्वाद्यभावमादाय लक्षणासंभवात्। प्रतियोग्यह[illegible]व्यादिर्यथावत्तागनुपपत्तिः। नवा निश्चे६
जलत्वादेः समवायेन साध्यतायां महाकालत्वादौ अतिव्याप्तिः। प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यंच स्वविशिष्टहे
त्वधिकरणावच्छेदेन बोध्यं॥ तेन द्रव्यं सत्वादित्यादौ द्रव्यत्वाद्यभावस्य काले हेतुमति प्रतियोगिसमानाधिकरणत्वेनातिव्याप्तिः॥ ॥ वि
हरंत्ववधातव्यं॥ ॥साध्यवन्निष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वरूपमेव व्यापकतावच्छेदकत्वमात्र
पूर्वलक्षणोचवृरूपं॥ नतु प्रतियोगिवैयधिकरण्यघटितं। तथासति व्यधिकरणधर्मावच्छिन्नाभावासत्वेपि संप्रमेयमित्याकारक

श्र १

दि.टी.ज्ञा.
२९

जन्यस्त्विति कृतिविषयत्वसामान्याभावमादायैव सर्वत्र लक्षणसमन्वयसंभवे प्रतियोग्यवृत्तिनिश्चेत्यादिग्रंथावतारानुपपत्तेः जन्यत्वस्य कृति दा॰ १
विषयत्वस्य तादृशज्ञानदशायामेव सत्त्वेन तदसत्त्वदशायामेव तादृशज्ञानविषयत्वाभावस्य हेतुसमानाधिकरणत्वात्। एवं चात्र
स्वविशिष्टपदेन कपिसंयोगाद्यात्मकाभावं गगनत्वादिविशिष्टस्य वाच्यत्वाद्यभावमनुपादाय कपिसंयोगाभाववान् प्रमेयत्वादित्यादौ
अव्याप्तिवारणेऽपि कपिसंयोगाभावत्वादेर्व्याप्यकतावच्छेदकत्वाभावात्। किंतु हेतुमति काले वर्तमानस्य सत्त्वसामान्याभाव
स्यापि निरुक्तरूपत्वाल्लित्वात्। तस्य चात्मादावसत्त्वेन यावद्धेत्वधिकरणे प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यविर
हात्। सत्तावान् द्रव्यत्वादित्यादावव्याप्तिवारकमेव स्वविशिष्टपदं। न च साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकधर्मावच्छिन्न
प्रतियोगिताकोऽभावो यत्र हेत्वधिकरणावच्छेदेन स्वावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरणस्त्वमि
त्येव सम्यक्। वाच्यत्वादिना घटाद्यभावमादायैव वाच्यं ज्ञेयत्वादित्यादौ लक्षणसमन्वयादिति वाच्यं। स्वरूपसंबंधेन प्रमेयत्वावच्छि
न्नाभावाप्रसिध्या प्रमेयत्वेन वाच्यं ज्ञेयत्वादित्यादौ अव्याप्तेः गुरुधर्मावच्छिन्नप्रतियोगिताप्रसिध्या प्रमेयवान् वह्निमान् धूमादित्या राम॰
दौ अव्याप्तेः। हेत्वनियामकसंबंधस्य प्रतियोगितानवच्छेदकत्वं यागीभाग्रे त्रत्वादित्यादौ स्वामित्वादिसंबंधेन गगनवारेः साध्यता २९

प्यामव्याप्तेश्चेति दिक्॥ ॥ननु वह्नित्वेन धूमवत्त्वेति सामान्याभावो धूमीयसंयोगसंबंधेन द्रव्यसामान्याभावो वा धूमाभाव एव॥ तथा
अयोगोलकभेदस्तदभाववान्यतरत्वेनायोगोलकान्यत्वेनाभावो योगोलकान्यत्वं स्वरूपसंबंधेन भेदसामान्याभावो वायोगो
लकान्यत्वाभाव एव समनियताभावानामैक्यात्॥ तथा च धूमाद्यभावस्य प्रतियोगितावच्छेदकं यद्वह्नित्वादिकं तदवच्छिन्ने
नैव समं व्याप्यत्वेत्वधिकरणे धूमाद्यभावस्य प्रतियोगिसमानाधिकरणत्वात्॥ धूमवान्वह्नेरित्यादावतिव्याप्तिः सामान्यध
र्मेण विशेषाभावाभ्युपगमे तु सुतरां तथा॥ धूमत्वेन धूमाद्यभावानामेव प्रमेयत्वादिना धूमाभावत्वेनापातस्य च स प्रतियो
गितावच्छेदकीभूतप्रमेयत्वाद्यवच्छिन्नसमानाधिकरणत्वादिति चेत्॥ अत्रापि यावत्तस्य फलतः प्रतियोगित्वस्य विशेषणा
त्पासाध्यव्यापकतावच्छेदकरूपावच्छिन्नयद्यत्प्रतियोगिताकोयत्समानाधिकरणाभावः स्वविशिष्टहेत्वधिकरणावच्छेदेन
तत्तत्प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वं पर्यवसितार्थः॥ तथा च धूमादिनिष्ठतादृशधूमत्वाद्यवच्छिन्न
प्रतियोगिताकाभावस्य धूमनिष्ठप्रतियोगित्वं तदवच्छेदकीभूतधूमत्वाद्यवच्छिन्नेन साध्यहेत्वधिकरणावच्छेदेन सामानाधि
करण्याविरहात्नातिप्रसंग इति सांप्रदायिकाः॥ ॥वस्तुतस्त्वत्रापि साध्यव्यापकतावच्छेदकरूपावच्छिन्ना यावन्तु न वृत्तिधर्मावच्छि
दि

सि.टी.जा.

ल्लापादेरप्रतियोगित्वान्निरुपितत्वाभावः। तादृशप्रतियोगितायाः यदवच्छेदकं तदवच्छिन्नसामानाधिकरण्यं वक्तव्यं। धूमत्वाश्रि

३० धूमाद्यभावस्य न प्रमेयत्वादिना धूमाद्यभावः सामान्यधर्मेण विशेषाभावस्यानभ्युपगमात्॥ तदभ्युपगमे तु पादेरप्रतियो

गिताकाभावेनाद्यप्रतियोगितावच्छेदकावच्छिन्नवद्भिन्नत्वस्य जगद्भिन्नत्वस्य रूपोऽतिरेकः। साध्य। व्यापकताव २३

च्छेदकरूपावच्छिन्नतादृशप्रतियोगिताकाभावानां तादृशप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं वाच्यं॥ अतो

न कोऽपि दोष इति ध्येयं॥ छ॥ ॥चक्रवर्तिलक्षणमाह केचित्त्विति। अनवच्छेदकमिति। यत्साध्यतावच्छेदकमिति पदेनान्वि

तं। घटत्वादिना वन्ह्याद्यभावमादाय वन्हिमान् धूमादित्यादौ लक्षणासंगतिः। व्यभिचारिणि तु हेतुसमानाधिकरणस्य साध्यसामा

साध्यतावच्छेदकं५ साभावस्यैव प्रतियोगितावच्छेदकं अतो नातिव्याप्तिः। कपिसंयोगी एतद्वृक्षत्वादित्यादौ अव्याप्तिवारणार्थं व्याप्यवृत्तेरिति॥ व

न्हित्वादिना घटादेरभावमादायाव्याप्तिरतः साध्येति। अत्र च प्रतियोगिता साध्यतावच्छेदकसंबंधेन ग्राह्या। तेन समवायसंबं ८

धेन वन्ह्याद्यभावस्य हेतुसमानाधिकरणस्य प्रतियोगितावच्छेदकत्वेपि वन्हित्वादेर्नासंभवः। प्रतियोगिवैयधिकरणस्य राम

प्रवेशेऽपि वाच्यं ज्ञेयत्वादित्यादावव्याप्तिः। प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेः। अतस्तत्परित्यागः। व्याप्यवृत्तित्वं तु निरवच्छि ३०

२४

न्न हेत्वधिकरणावृत्तित्वं। हेत्वधिकरणाय यत्किंचिद्व्यक्तिनिष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं पक्षभाववृ
एवं च २ त्तित्वं न तु त्वं चाऽन्वाभाव्यमेव हेतुसमानाधिकरणस्येत्यर्थः। न तु स्वातंत्र्येण तद्विशेषणं वैयर्थ्यापत्तेः। यत्किंचिद्व्यक्तित्वनिवेशात्संयोगाभा कपि २
वत्वस्य हेत्वधिकरणीभूतद्रव्यनिष्ठाभावप्रतियोगित्वेपि संयोगिमत्वादित्यादौ नाऽव्याप्तिः। ननु समनियताभावानामैक्यात् तथ
टत्वेन वन्ह्यभावस्यैव वन्हित्वेन घटाभाववत्त्या हेतुसमानाधिकरणस्य तादृशस्यैव साध्याभावस्य प्रतियोगितावच्छेदकं वन्हित्वादिक प्रतियोगिक ४
मित्यव्याप्तिरतः समनियताभावैक्यमतेपि निरुक्तिमाह। हेतुसमानाधिकरणस्येति। व्याप्यवृत्तेरभावस्य प्रतियोगितायाः सामा
नाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकमिति योजना। नन्वत्रापि हेतुसमानाधिकरणस्य वन्हित्वेन वन्हिधूमोभयाभावस्य व
न्हित्वेन पर्वतावृत्तेरभावस्य च प्रतियोगितायाः सामानाधिकरण्येन वन्हित्वमवच्छेदकमित्यव्याप्तिः। तादृशप्रतियोगितया
त ऽवच्छिन्नवृत्तित्वे सति यदवच्छेदकं तदन्यत्वोक्तावपि भा पर्वते वन्हित्वेन तार्णत्वार्णोभयं नास्तीति प्रतीतिसिद्धस्य तादृशाभावस्य दहनो ८
प्रतियोगितावच्छेदकत्वाद्वन्हित्वस्य। अन्यतादृशाभावप्रतियोगितावच्छेदकत्वेन वन्हित्वमात्रे पर्याप्तिः किंतु तार्णतारार्णोभयत्वेपि। अप
र्याप्ततादृशाभावप्रतियोगितावच्छेदकीभूतवन्हित्वावच्छिन्नवति पर्वतादौ तादृशाभावासत्वप्रसंग इति वाच्यं। सोऽयं समनेप्रतियोगिता

शि.टी.ज्ञा. वच्छेदकधर्मावच्छिन्नवत्तामात्रस्याभावाविरोधित्वात्। एवं सति घटवति घटत्वेन घटाभावस्यापलापापत्तेः। किंतु प्रतीतिबलात्कथमधिक
३१ रणधर्मस्याप्रतियोगितावच्छेदकत्वसिद्धौ सत्यां प्रतियोग्यंशे प्रकारीभूतधर्मविशिष्टप्रतियोगितावच्छेदकावच्छिन्नेनैव सार्धमन्ना
यत्याभावस्य विरोधित्वं वाच्यं। तदेतद्वह्नित्वादिना तादात्म्येनारोपाभावाभावादिसत्वेपि न क्षतिकरं। अत एव द्रव्यत्वेन वह्निर्नास्ति च
वह्नित्वेन तत्तद्वह्निर्नास्तीत्यादिप्रतीत्या सामान्यधर्मेण विशेषाभावोऽभ्युपपद्यते। न च तत्र वह्नित्वस्यैव प्रतियोगितावच्छेदकत्वं
भासते। द्रव्यत्वस्य तु वैशिष्ट्यमात्रं विषय इति वाच्यं। वह्निमानयमित्येवं निर्णयसत्वेपि द्रव्यत्वेन वह्निर्नास्तीति प्रत्ययाद्द्रव्यत्वस्य
वावच्छेदकत्वाभानात्। अन्यथा वह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वप्रकारेण वन्ह्यभावबुद्धौ वह्नित्वेन वह्निमत्तानिश्च
यस्य प्रतिबंधकत्वात्तादृशप्रतीत्यसंभवापत्तेः। अस्माकं तु द्रव्यत्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वेन वन्ह्यभावबुद्धिं प्रति द्रव्यत्वेन नि७
वि वह्नित्वविशिष्टनिश्चयस्यैव विरोधित्वात् तदसत्वादेव तादृशाभावप्रतीतिसंभवादित्यतो लक्षणांतरमाहुः। प्रतियोग्यधिकरणस्यैवे
ना२ ति। केचित्तु समानाधिकरणस्य मभेदः। तथा च हेतुसमानाधिकरणाभावीयस्वाभिन्नप्रतियोगितायाः। अवच्छेदकं पद्यत्वं तदन्यत्वं साध्य राम
तावच्छेदके विवक्षितं। प्रतियोगित्वं हि स्वस्वसंबंधविशेषः। स च सामान्याभावस्थले प्रतियोगितावच्छेदकरूप एव न तु प्रतियोगिस्वरूपः अ ३१

अभेदेन १

ननुगमात्। आधाराधेयभावानुपपत्तेश्च। सामान्यधर्मेण विशेषाभावस्थले तु प्रतियोग्यंशे प्रकारीभूतो यो विशेषधर्मः स एव न तु
सामान्यधर्मः अतिप्रसक्तत्वात्। अधिकरणधर्मावच्छिन्ना[illegible]भावस्थले तु प्रतियोगितावच्छेदकादिस्वरूपं न तु प्रतियोगित्वं
किं त्वतिरिक्तमेव। अन्यथा प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनैव साधर्म्यभावस्याविरोधित्वात् तदवच्छिन्नवृत्ति
तादृशाभावासत्त्वप्रसंगात्। विवादोप्यतिरिक्तायां प्रतियोगितायामेव। अन्यथा समनियताभावानामैक्येनाखिलव्यधि पा४
करणधर्मावच्छिन्नाभावस्यैव गगनाभावात्मकतया गगनाभावस्वीकर्तॄणां चिन्तामणिकारादीनां तदनंगीकारानुपप
वह्नीन स्याइ६ त्ते[illegible]श्च पर्वते वह्नित्वेन तार्णता[illegible]तिप्रतीतिबलात् तादृशाभावप्रतियोगितावच्छेदकतस्य वह्नित्वसत्त्वे
पि तादृशप्रतियोगित्वेन वह्नित्वस्वरूपं किं तु तादृशाभयत्वाभिन्नमतिरिक्तमेव वा। तथा च स्वाभिन्नायाः साधनवन्निष्ठा
भावप्रतियोगितायाः यदवच्छेदकं तदन्यत्वस्य वह्नित्वे सत्त्वान्न तस्य धूमव्यापकतावच्छेदकत्वहानिः। नन्विहलस्या
हेत्वधिकरणावृत्तित्वमभावस्य संबंधमात्रेण वाच्यं। वह्निसामान्याभावस्य कालिकसंबंधेन धूमवति सत्त्वादव्याप्त्यापत्तेः
नापि दैशिकविशेष[illegible]णतावि शेषसंबंधेन। घटभिन्नद्रव्यत्वादित्यादावतिव्याप्त्यापत्तेः। घटत्वस्वरूपस्य साध्याभाव

सि·टी·जा· ३२

सद्वैशिकविशेषणतापन्नस्वविरहाक्षिप्तनोलक्षणांतरमाह। प्रतियोगिव्यधिकरणस्येतीतिप्राहुः॥ केचित्तु प्रागुक्तं व्याप्यवृत्ति
त्वं यत्किंचिद्घटितत्वेन दुर्वचमतः प्रतियोगिव्यधिकरणस्य वेत्यादिलक्षणांतरमुक्तमित्यप्याहुः॥ हेतुसमानाधिकरणस्य प्रति
योगिव्यधिकरणस्याभावस्य प्रतियोगिसामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकमिति योजना। अथात्र प्रतियो
गिव्यधिकरणत्वं न स्वप्रतियोगिसमानाधिकरणभिन्नत्वं समनियताभावानामैक्ये न घटत्वेन घटाभावादेरपि घटत्वेन प्र
मेयसामान्याभावस्वरूपत्वात्तस्य च प्रमेयात्मकप्रतियोगिसमानाधिकरणत्वात्तदन्यत्वासंभवात्। अत एव स्वप्रतियोगि
तावच्छेदकावच्छिन्नसमानाधिकरणो यो यः। तद्भिन्नत्वमपि न तथा घटत्वेन घटाभावादेरेव प्रमेयत्वादिना घटोऽपि द्रव्यत्वेन घट घभावा
वद्भेदेऽभावस्य वा तादात्म्योपगमात् प्रसिद्ध्यापत्तेः। अधिकरणधर्मावच्छिन्नाभावस्यापि तत एव वारणसंभवे [redacted]
त्प्राप्तिवारकसामानाधिकरण्ये तत्स्य वैयर्थ्यापाताच्च। न च साध्यतावच्छेदकसंबंधेन यादृशप्रतियोगिताश्रयानधिक
रणं हेत्वधिकरणं तादृशप्रतियोगित्वं प्रतियोगितात्वार्थः। तथा च वह्नित्वेन घटाभावीयघटनिष्ठप्रतियोगितामपि तादृशामते राम·
तदवच्छेदकत्वं वह्नित्वे व्याप्तीतिसामानाधिकरण्यपदं। तेन तादृशप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकत्वाप्रसिद्ध्यातदि ३२

सेः नपि

न्नप्रतियोगितैवलक्षणघटिकेतिवाच्यं। विशिष्टसत्तावान्जातेरित्यादावतिव्याप्तेः। गुणादीनां विशिष्टसत्तानिष्ठप्रतियोगिताश्रयाधि
करणत्वात्। घटवान्महाकालत्वादित्यादावव्याप्तिप्रसंगाच्च। साध्यताघटककालिकसंबंधेन घ+ हेतुमतो महाकालस्य+
घटाभावप्रतियोगिताश्रयाधिकरणत्वात्तथाप्रतियोग्यधिकरणाभावाप्रसिद्धेरिति चेदत्राहुः। साध्यतावच्छेदकसंबंधेन स्वाश्र
यवृत्तित्वावच्छेदकधर्मावच्छिन्नाधिकरणयावद्वृत्त्वविशिष्टिकाऽभावत्वःप्रतियोगिता। तदन्यप्रतियोगित्वं प्रतियोगितांतार्थः।
पि तथाचवह्नित्वेनघटाद्यभावस्य घटादिनिष्ठप्रतियोगितातादृशीति तदवच्छेदकत्वं वह्नित्वेप्रसक्तमतः सामानाधिकरण्यपदं।
रु घटवान्महाकालत्वादित्यादौ गगनाभावीयगगननिष्ठप्रतियोगित्वं तादृशं सुलभमिति न कोपि दोषः। वस्तुतो धूमवति वह्नित्वे
न घटो नास्तीति वद्धूमवान्वह्नित्वेन न घटवान्न किंतु घटत्वेनेति प्रतीतिबलात् व्याधिकरणधर्मावच्छिन्नावच्छेदकतानिरूपितप्रति
योगिताको ~~[illegible]~~ भावोऽप्यस्ति। अतएव समवायितया वाच्यत्ववद्भेदो घटादौ प्रत्यक्षसि
द्धेः स्वीकृतः। तथा च यादृशप्रतियोगितावच्छेदकावच्छिन्नीयत्वेन साध्यतावच्छेदकसंबंधेन यादृशप्रतियोगिताश्रयाधिक
रणगामित्वं हेतुमतः तादृशप्रतियोगितासमानाधिकरणतद्भिन्नत्वावच्छिन्नप्रतियोगिताकतादृशप्रतियोगितावच्छेदकताभाव

सि॰टी॰जा॰

३३

वत्त्वं तादृशप्रतियोगितावच्छेदकान्यत्वं वा साध्यतावच्छेदके विवक्षितं तथा च घटादिनिष्ठस्य वह्नित्वेन घटाभावप्रतियोगित्वस्यापि
तादृशत्वेन वह्नित्वादेस्तदवच्छेदकत्वाद्व्याप्तिरतः सामानाधिकरण्येनेत्युक्तं। तथा च वह्नित्वस्य तादृशाभावप्रतियोगितावच्छे
दकत्वेपि तादृशप्रतियोगितासमानाधिकरणवृत्तित्वरूपव्यधिकरणधर्मेण तादृशप्रतियोगितावच्छेदकत्वाभावस्य तत्र सत्
त्वान्नाव्याप्तिः। कालो घटवान्महाकालत्वादित्यादौ तु घटादिसामान्याभावप्रतियोगितायाः तथात्वेपि घटत्वेन पटाभावप्रति अं ४
योगितामादायैव लक्षणसंगतिः। कालः पटत्वेन पटवान्न तु घटत्वेनेत्यनुभवात्। वह्नित्वादिसामान्यधर्मेण महानसीयव
ह्न्यभावस्य त्वेतादृशप्रतियोगितावच्छेदकेत्यत्रावच्छेदकत्वमनतिरिक्तवृत्तित्वं ग्राह्यं। तच्चानतिरिक्तवृत्तित्वे सति तत्समाना
धिकरणं यत्तदन्यत्वं नातो व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितायास्तत एव कारणासंभवे सामानाधिकरण्येनेत्यस्य वैयर्थ्यमि
त्यस्मद्गुरुचरणाः। वस्तुतः प्रतियोगितावच्छेदकविशिष्टस्य यत्प्रतियोगितानाश्रयस्य हेतोः साध्यतावच्छेदकसंबंधेनाधिकरणो राम॰
हेत्वधिकरणं तादृशप्रतियोगित्वं प्रतियोगितांतार्थः। तथा च वह्नित्वेन घटाभावस्य घटनिष्ठप्रतियोगिताया अपि तादृशत्वाद्वह्नि ३३
त्वादेस्तदवच्छेदकत्वमादायाव्याप्तिरतः सामानाधिकरण्येनेति प्रागुक्तार्थकं। एतन्मते च सामान्यरूपेण विशेषाभावानभ्युपगमः।

नात्तो वह्नित्वेन तद्धूमाभाववमादाय पाव्याप्तिः । न च स्वरूपसंबंधात्मकप्रतियोगितायाः प्रतियोगिभेदेन भिन्नत्वाद्वह्निमान् धूमादित्यादा
वव्याप्तिः । वह्निसामान्याभावीयस्य महानसीयवह्निनिष्ठप्रतियोगित्वं तदवच्छेदकीभूतवह्नित्वविशिष्टस्य तत्प्रतियोगिताश्रयीभूत
महानसीयवह्नेर्धूमस्य हेतोरनधिकरणत्वस्य हेतुमति पर्वतेऽसत्त्वादिति वाच्यं । प्रतियोगिव्यक्तीनां भेदेप्येकधर्मावच्छिन्नप्रतियोगिता
याः लाघवेनैक्यस्वीकारात् । न च कालो घटवान्महाकालत्वादित्यादौ तादृशप्रतियोगित्वाप्रसिद्ध्याव्याप्तिः । गगनाद्यभावीयप्रति
योगिताश्रयीभूतगगनस्याधिकरणाप्रसिद्ध्या तादृशप्रतियोगितायाः लक्षणाघटकत्वादिति वाच्यं । महाकालान्यत्वविशिष्टघ
घ टत्वावच्छिन्नप्रतियोगिताव्यक्तेरेव तथात्वादित्याहुः । तन्न प्रतियोगिभेदेपि प्रतियोगितावच्छेदकाभेदेन प्रतियोगितायाः यद्यभेदः
तदा वह्नित्वेन घटाद्यभावस्यापि वह्नित्वेन घटनिष्ठप्रतियोगितासैव वह्नित्वेन वह्निधूमोभयाभावस्यापि वह्नित्वावच्छिन्नधूमा
दिनिष्ठप्रतियोगिता लाघवात् । तथा च सामानाधिकरण्येनैतस्यैवाव्याप्त्यं दुर्वारं । वह्नित्वेन घटाभावीयघटनिष्ठप्रतियोगित्वं त
दवच्छेदकीभूतवह्नित्वविशिष्टस्य तादृशप्रतियोगिताश्रयीभूतवह्निधूमादेस्तद्धेतोरधिकरणत्वस्य सत्त्वेऽपि हेतुमति सत्त्वेन वह्नित्व
१ रूपव्यधिकरणधर्मावच्छिन्नप्रतियोगितायाः लक्षणाघटकत्वादिति दिक् ॥ एवं चेति । तथा चाव्यभिचारस्य पारिभाषिकत्वानादरेपि न

प्रतियोगितावच्छेदकविशिष्टप्रतियोगिताश्रयो यत्संबंधाहे साधिकरणपद्धतिचित्तनिष्ठाभावप्रतियोगितावच्छेदकं तादृशप्रतियोगितायाः [illegible] इत्यर्थः
त्वे नगगनान्तादिकमादायैव तत्र लक्षणसंगत्वाच्छेति ५

से

शि.दी.जा. त्त्यतिरिति भावः। वह्नित्वाद्यवच्छिन्नघटाभाववति धूमादेर्वर्त्तमानत्वादत उक्तं साध्याभावेति। अत्र साध्याभावो व्यापकवृत्तिर्बोध्यः। ए
वंपरत्रापि विशिष्टेति। महानसीयवह्न्यादिविशिष्टवह्नित्वावच्छिन्नप्रतियोगिताकेत्यर्थः। ननु विशिष्टस्यातिरिक्तत्वात् महानसीयव
३५ व वह्नित्वयोर्वैशिष्ट्यस्यैवापरम्परयावच्छेदकत्वान्नैष दोष इत्यत आह। दण्डवान्ह्नित्वेति। ननु व्याप्यवृत्तित्वघटितलक्षणेऽपि संयो
गिसत्त्वादित्यत्राव्याप्तिः। स्वसमानाधिकरणाभावाप्रतियोगित्वरूपस्य स्वावच्छिन्नवृत्तिकान्यत्वरूपस्य वा व्याप्यवृत्तित्वस्य सं
योगाभावे सत्त्वादत आह। सत्त्ववतीति। तथा च हेतुसमानाधिकरणस्य व्याप्यवृत्तेरित्यं तेन निरवच्छिन्नहेत्वधिकरणवृत्तित्वं हेत्व
धिकरणीभूतयत्किंचिद्व्यक्तिनिष्ठाभावाप्रतियोगित्वं वाभावस्य विवक्षितमिति भावः। गुरुधर्मेणाव्याप्त्यापत्त्याभिधायिरापत्तिमा
शिवारणाय पारिभाषिकावच्छेदकत्वानुसरणस्यावश्यकत्वे व्याप्यवृत्तित्वस्य प्रकृते तन्निरुक्तावप्रवेशोऽन्यतिरित्याशयेनाह वस्तु पि
मात्रवृत्तीति। यथाश्रुतस्य प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्योक्तौ सत्ताजात्यातेऽव्याप्तिः। नादत्र प्रतियोगितावच्छे राम.
दकीभूतविशिष्टसत्त्वानतिरिक्तवृत्तित्वात् सत्तात्वस्येत्यतेव स्वसमानाधिकरणमिति। मिश्रांतल्लक्षणेव स्वसमानाधिकरणमित्यर्थः। तथा च हेतुमन्नि ३५
ष्ठाभावीयपरसंबंधावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकं यत्स्वमविशिष्टसंबंधेन निष्ठाभावीयपरत्वसंबंधावच्छि

न्नप्रतियोगिताया: सामानाधिकरण्येनानवच्छेदकं तदेव पारिभाषिकावच्छेदकं तदन्यत्वं साध्यतावच्छेदके वाच्यमिति भावः। ननु उत्पत्तिद
शायां गुणसामान्याभावस्य संयोगवति घटादौ सत्वाद्गुणत्वस्य तं [redacted]। योगत्वविशिष्टसंबंधिनिष्ठाभावीयप्र
मवामसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वविरहात् न तत्प्रागादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वसंभावनापीत्यत आह। गु
णावृत्तित्वेति। गुणासमवेतेत्यर्थः। घटादौ प्रतियोगित्वरूपसामान्यापि गुणासमवेतत्वाद्रूपत्वादेः सत्वान्न तदभाववृत्तिभावः। संयोगगु
णान्यत्वे सति सत्ताधिकरणादौ गुणावृत्तित्वमादाय संयोगत्वस्य न पारिभाषिकावच्छेदकत्वं संभवति गुणावृत्तित्वावच्छिन्नाभावस्य
हेतुसमानाधिकरणत्वात् तत: संयोगसाध्यककृत्यभिचारिमात्रे पक्षधर्मतामादाय संयोगत्वस्य पारिभाषिकावच्छेदकत्वेन त्वमित्याह। द्रव्यमा
त्रेति। द्रव्यान्यासमवेतेत्यर्थः। उक्ताभावानामव्याप्यवृत्तित्वे संयोगात्मकस्वप्रतियोग्यधिकरणावृत्तित्वेन कदाचिद्गुणत्वादिरूपाणां व
प्रतियोगितावच्छेदकानां संयोगत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं न स्यात्तदेवमात्तितेषां व्याप्यवृत्तित्वपर्यालोचनया संयोगप्र
त्मकप्रतियोग्यनधिकरणावृत्तित्वादेकाभावन्नात्रसूचनाय व्याप्यवृत्तीत्युक्तं। प्रागल्लक्षणे दुष्टत्वमपि उपपन्नस्यादिति। साध्यतावच्छेदकेति। वि
पदं विशिष्टहेतुपरं। तथा च पक्षधर्मावच्छिन्नसमानाधिकरणसाध्याभाववृत्त्यवच्छेदेन साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्य

त

ग्रि॰टी॰ज्ञा॰
३५

तत्स्वरूपत्वंपर्यवसितं। अवच्छेदकत्वंचात्रानतिरिक्तवृत्तित्वं। व्यभिचारिणितु हेतुसमानाधिकरण[स्य]साध्यसामान्याभावस्यैवसाध्यसामाना
धिकरण्यविरहान्नातिप्रसंगः। विशिष्टसत्ताद्याक्रांतेऽत्यादौ यावत एवहेतुसमानाधिकरणसाध्याभावस्यसत्तारूपसाध्यसामानाधिक
रण्यादतिव्याप्तिरतःसाध्यतावच्छेदकावच्छिन्नेति। तथाचविशिष्टसत्ता[redacted]ऽभावस्यैवतादृशस्यविशिष्टसत्तासमानाधिकरणत्वाभा रूपसाध्य३
वान्नातिप्रसंगः। अत्रचसाध्यसामानाधिकरण्यंतुयेनसंबंधेनसाध्यतातेनसंबंधेनसाध्यस्याधिकरणेदैशिकविशेषणतयावृत्ति
मत्वरूपंबोध्यं। तेनद्रव्यत्वादिसमानाधिकरणस्यज्ञानाद्यभावस्यविषयतयाज्ञानस्याधिकरणेवृत्त्यावपिसमवायेनज्ञानसाध्यकद्र
व्यत्वादिहेतौनाऽव्याप्तिः। नवाकालः घटोमेयत्वादित्यादौसर्वेषामेवसाध्याभावानांसाध्यवतिकालेकालिकसंबंधेनवृत्तौऽतिप्र अपि
संगः। साध्याभावनिष्ठंहेतुसामानाधिकरण्यमपिहेतुतावच्छेदकसंबंधेनग्राह्यंतेनहेतोर्व्यधिकरणं। तत्रविशेषणतयावृत्तिमत्वरूपंबो
ध्यं। तेनघटप्रमात्मकज्ञानादिसाध्यकेविषयतयाज्ञानस्यहेतोरधिकरणेवर्तमानस्यापिमूलसामान्याभावस्यद्रव्यविशिष्टसत्वादित्यादौसत्ता व राम॰
समानाधिकरणस्यद्रव्यत्वसामान्याभावस्यसाध्यसामानाधिकरण्यविरहेपिनाव्याप्तिः। नवाकालः कालपरिमाणादित्यादौहेत्व ३५
धिकरणेकालेकालिकसंबंधेनवर्तमानस्यकालत्वादिसामान्याभावस्यसाध्यवतिदैशिकविशेषणतयावृत्तिमत्वविरहेऽस्तितःसा

ध्याभावस्तत्रएवेतिद्वितीयपरीत्याबोध्यः।तेनव्यधिकरणधर्मावच्छिन्नाभावत्वेपिसाध्यस्यविशिष्टाभावादिकमादायेपिवलक्षणासंभवा
प्रतियोग्यवृत्तित्वस्यादिग्भावेनतागानुपपत्तिः।कपिसंयोगिसत्त्वादित्यादौतुकपिसंयोगाद्यभावस्यसाध्यसमानाधिकरणत्वेपि
वृत्त्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकाभावस्यसाध्यसामानाधिकरण्यविरहान्नातिव्याप्तिः।कालिकसंबंधावच्छिन्न
प्रतियोगिताकेत्याकाशाभावस्याभावेसाध्येयत्रधर्मेयत्वादिकेहेतुःनत्रहेतुमतिदैशिकविशेषणतयावर्त्तमानस्याकाशाभा
वात्मकस्यसाध्याभावस्यसाध्यवन्निदैशिकविशेषणतयावृत्त्यावपिहेतुसमानाधिकरणस्यनित्यत्वसामान्याभावस्यापिनिरुक्त दि ५
साध्याभाववत्तयात्तस्यैवसाध्यसामानाधिकरण्यविरहान्नातिव्याप्तिरिति।यत्समानाधिकरणेति।यत्समानाधिकरणसाध्याभावप्र
सामान्यमित्यर्थः।तेनधूमवान्वह्नेरित्यादौव्यधिकरणधर्मावच्छिन्नसाध्याभावप्रमाव्यक्तेःसाध्यवत्ताज्ञानाविरोधित्वेपिसाध्य
सामान्याभावप्रमायाएवसाध्यवत्ताज्ञानविरोधितयानातिव्याप्तिः।व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यसाध्यसामान्याभा
वत्वेभ्रमदशायांपर्वतोवह्निमानित्याकारकसाध्यवत्ताज्ञानविरोधित्वादसंभवस्यादतःप्रमात्वोपादानं।प्रमात्वंचात्रभ्रमसामा
न्याभिन्नज्ञानत्वंनातःकाशशाबुद्धेरप्रमात्वात्प्रमात्वाद्युक्तदोषतादवस्थ्यं।ह्रदादौवह्निसामान्याभावप्रमायाःसाध्यवत्ताधीविरोधित्वा

सि॰टी॰जा॰ ३६

तत्राव्याप्तिरतो यत्समानाधिकरणेति। फलतः प्रमाविशेषणं। तथा च यत्धर्मावच्छिन्नवह्निविशेष्यकसाध्याभावप्रमासामान्यवृत्त्यर्थः।
तेनैतद्वृक्षत्वसमानाधिकरणस्य संयोगसामान्याभावस्यैव गुणे धर्मिप्रमायाः साध्यवत्ताज्ञानविरोधित्वेपि संयोगी एतद्वृक्षत्वादि
त्यादेर्नाव्याप्तिः। यत्तु साध्यवत्ताज्ञानविरोधित्वं हेतुमन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकं यत्साध्यवत्ताज्ञानं तद्विरोधित्वरूपं वाच्यं। त
नं४ था च गुणे संयोगीति प्रमायाः गुणः संयोगीत्याकारकबुद्धिविरोधित्वेपि तादृशी साध्यवत्ताबुद्धिर्न हेतुमन्मात्रधर्मावच्छिन्नविशेष्य रति
का गुणत्वादेर्हेतुमदन्यवृत्तित्वादतो नोक्तदोष इति तन्न। यत्समानाधिकरणेत्यस्य वैयर्थ्यापत्तेः। साध्याभावप्रमासामान्यीयहे
तुमन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकसाध्यवत्ताज्ञानस्याविरोधित्वं नास्तीति तत्त्वमित्यस्यैव सम्यक्त्वात्। जलत्वादिधर्मिकवह्निसामान्याभाव
प्रमायाः साध्यवत्ताधीविरोधित्वेपि धूमवन्मात्रवृत्तिधर्मावच्छिन्नविशेष्यकं यद्वह्निमत्ताज्ञानं तदविरोधित्वाद्देववह्निमान् धूमादित्या
दावव्याप्त्यसंभवादिति दिक्॥ अत्र च साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकरूपेण च साध्यवत्ताज्ञानं विरोधित्वं बोध्यं। तेन पर्व
न तसमवायेन वह्निमानिति प्रमायाः समवायेन वह्निमत्ताबुद्धिं प्रति पर्वतो महानसीयवह्निमानिति प्रमायाश्च संयोगेन महानसीयवह्नि रामः
मत्ताबुद्धिं प्रति [illegible]प्रतिबंधकत्वेपि वह्निमान्धूमादित्यादावव्याप्तिः। प्रतिबंधकत्वं चात्रावच्छेदकधर्मवत्ताग्रहादिव्यावृत्तं बोध्यं। तेन वह्नि ३६

नं३

क२

सामान्याभावावच्छेदकतापर्याप्तिस्वमहानसीयवन्ह्यभाववादेः पर्वतादौ प्रमायाः संयोगसंबंधावच्छिन्नपर्वतधर्मिकवन्हिमत्ताबुद्धिविरो
धित्वेपिनासंभवः। सर्वत्रेति। साध्यसामानाधिकरण्यावच्छेदस्वसमानाधिकरणत्वकत्वमित्यतएवप्रथमस्याहितं। यस्यचयत्समा
नाधिकरणप्रमासामान्येसाध्यवत्ताज्ञानविरोधित्वंनास्तितत्त्वमित्यतएवसामंजस्यादितिभावः। यत्तुयत्समानाधिकरणसाध्याभा
वत्वावच्छेदेनसाध्यतावच्छेदेनसाध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्यंतत्त्वमेवप्रथमलक्षणार्थः। तथाचहेतुसमा
नाधिकरणस्यघटादिसाध्याभावस्यवन्हित्वाद्यवच्छिन्नघटाद्यप्रसिद्ध्यासाध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्या
भावादसंभवस्यादतः साध्याभावपदं। नचैवमपिप्रतियोगिपदवैयर्थ्यमेवेतिवाच्यं। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वेसाध्यतावच्छे
दकावच्छिन्नप्रतियोगिसामानाधिकरण्याभावस्याखंडस्यैवनिविष्टत्वात्। एवंद्वितीयलक्षणेपिसाध्यतावच्छेदकावच्छिन्नप्रतियोगिमत्त्वा
ज्ञानविरोधित्वंनिविष्टप्रसाध्याभावपदसार्थक्यंबोध्यमितिमतं। तन्मंदं। प्रतियोग्यवृत्तिश्चेत्यादिग्रंथावतरणानुरोधेनसाध्याभावस्यपूर्वो
क्तदिशापरीत्यावक्तव्यतयाहेतुसमानाधिकरणस्यवन्हित्वेनघटाभावादेः साध्यतावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्य
प्रसिद्ध्यातादृशपदप्रक्षेपेप्यसंभवतादवस्थ्यात्। नचघटत्वेनवन्ह्यभावएववन्हित्वेनघटाभावः समनियताभावानामैक्यात्तस्यापिस

ध्यतावच्छेदकविशिष्टवह्निरूपप्रतियोगिनः सामानाधिकरण्यमक्षतमेवेति वाच्यं। तथा सति घटसामान्याभावोऽपि घटत्वादिना प्रमेयत्वसा
माप्याभावात्मकतया तस्यापि साध्यतावच्छेदकीभूतवह्नित्वावच्छिन्नप्रमेयरूपप्रतियोगिसमानाधिकरणतया तमादायासंभववारक
स्य साध्याभावपदस्य व्यर्थतापाव ज्जलेपत्वादिति। प्रगल्भस्य बलरूपाणां नानुपपन्नमिति। यत्किंचिति। यद्रूपावितीति। यन्निष्ठसाध्याभाववद्वृत्ति
त्वसामान्यस्येत्यर्थः। तेन वह्निनिष्ठस्य व्यभिकरणधर्मावच्छिन्नधूमाभाववद्वृत्तित्वस्य धूमसाध्यकानुमित्यविरोधित्वेऽपि धूमवान्वह्नेरित्यादौ दि
नातिव्याप्तिः। धूमादिनिष्ठस्य च तत्वाद्यवच्छिन्नवह्न्यभाववद्वृत्तित्वस्यापि धूमत्वादिप्रकारेण वह्न्यनुमितौ विरोधित्वादसंभवः स्यादतः
प्रकृतेति। साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकरूपेण प्रकृतसाध्यकेत्यर्थः। तथा च तादृशसाध्याभाववद्वृत्तित्वस्य वह्नित्वेन व
न्ह्यनुमितिं प्रत्यविरोधित्वाद्दोषः। प्रकृतानुमितिविरोधित्वं न प्रकृतानुमितिविरोधिज्ञानविषयत्वमात्रं धूमनिष्ठवृत्तित्वस्यापि वन्ह्य
नुमितिविरोधिनो व्यभिचारज्ञानस्य विषयत्वसंभवात्। किंतु विषयतया प्रकृतानुमितिप्रतिबंधकतावच्छेदकत्वं तच्च वह्निनिष्ठवृत्तित्व राम
मात्रस्य धूमसाध्यकानुमितिविरोधितावच्छेदकत्वाभावान्न व्यभिचारिण्यतिव्याप्तिः तत्साध्याभाववती। तथा च यन्निष्ठसाध्याभावव ३७
द्वृत्तित्वसामान्यं प्रकृतानुमितिप्रतिबंधकतानवच्छेदकं तत्वमित्यर्थः। न च घटाभाववद्वृत्तित्वादौ साध्याभाववद्वृत्तित्वभ्रमदशायामपि धूमसा

व्याम ३

ध्यकानुमित्यनुत्पत्त्यावन्हिनिष्ठनिर्धूमवृत्तित्वस्य धूमसाध्यकानुमितिप्रतिबंधकतानवच्छेदकत्वात्व्यभिचारितापत्तिर्व्याप्तितादवस्थ्यमिति
वाच्यं यन्निष्ठसाध्याभाववद्वृत्तित्वविषयितासामान्यं न प्रकृतानुमितिप्रतिबंधकतावच्छेदकतानतिरिक्तवृत्तित्वविशिष्टस्याप्रसिद्धत्वात् साध्याभाव
वत्त्वपूर्वोक्तदिशा परीत्या निवेशनीयः। तेन न पूर्वोक्तदोषः। अनुमित्यविरोधित्वं ज्ञानस्येति। अनुमितिविरोधित्वं हि न साक्षादनुमितिप्र
तिबंधकत्वं व्यभिचारस्थिरः साक्षात्तथात्वेन व्यभिचारिमात्रेतिप्रसंगापत्तेः। किंत्वनुमितिजनकज्ञानविरोधित्वं तज्जनकं च व्याप्ति
द्विनिरूपकव्याप्तिज्ञाने तदाकारज्ञानं प्रति साध्याभाववद्वृत्तित्वज्ञानं न विरोधि किंतु साध्याभाववद्वृत्तित्वज्ञानमनुमितिविरोधि तस्या
कारकज्ञानमेव तथेति व्यभिचारितापत्तिव्याप्तिः। यद्दिशा साध्याभाववद्वृत्तिर्हेतुरित्याकारकं ज्ञानं प्रकृतानुमितिजनकं तद्धानिरूपकव्याप्ते
रनुमित्यनुपयुक्तत्वात्तदभिधानमर्थांतरग्रस्तमिति भावः। एतेन यदि प्रकृतानुमितिपदेन प्रकृतहेतुधर्मिकसाध्यकानुमितिपरं। ननु प्रकृत
साध्यकानुमितिपरं। विरोधित्वं चात्र साक्षादेव निवेश्यमतेन तदानव्यभिचारितापत्तिप्रसंग इत्यपास्तं। तादृशव्याप्तेरनुमित्यनुपयुक्तत्वात्तद
भिधानेऽर्थांतरतादवस्थ्यादिति। निष्कलत्वात्प्रसक्त्युपपत्स्यते। किंचिदिति। केवलान्वयिनि प्रसिद्धवाच्यत्वादिसाध्यकेऽव्याप्तिरिति
पाद्यंतः साध्याभावाप्रसिद्ध्या तज्ज्ञानाप्रसक्तत्वात्तदधिकरणावृत्तित्वाभावेन हेतुतावच्छेदकरूपात्मकमप्रसिद्ध्यमतत्तदुक्तं। प्रत्येकमिति। यावंतः साध्या

व्या॰२

शि॰दी॰जा॰ भावाः प्रत्येकं तेषामपि सजातीयत्वं एकस्मिन्नभावेनास्तीत्यतउक्तं। तत्तत्सजातीया इति। तदधिकरणावृत्तित्वाभाववद्वृत्त्युक्तेस्तद्देशयावत्सा
३८ ध्याभावपरामर्शे वह्निमान्धूमाद्रूपसामान्याभाववान्वायुत्वादित्यादौ साध्याभावात्मकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावयावद्रूपाघटि
करणाप्रसिद्ध्या व्याप्तिरतः तत्तदधिकरणेति। तथाचप्रतिस्वीकरूपेणसाध्याभावाधिकरणादापन्नतत्तत्सजातीयः तत्तदधिकरणावृत्तित्वाभा ठु३
वैशिष्ट्याद्यवृत्तिभावः। व्यधिकरणधर्मावच्छिन्नसाध्याभावसजातीयघटत्वादिनातत्तदधिकरणावृत्तित्वाभावमादायव्यभिचारि
णापत्तिव्याप्तिवारणाययावंतइति। तथाचसाध्यसामान्याभावसजातीयस्यतदधिकरणावृत्तित्वाभावस्यतत्रासत्वाददोषः। साध्याभा
ववद्वृत्तित्वस्यैवव्यधिकरणधर्मावच्छिन्नाभावोऽव्यभिचारिण्यपसक्तीत्यतउक्तंसजातीयाइति। ननुघटत्वेननिर्धूमवृत्तित्वस्याभावोऽप्यभाववादि
नाधूमसामान्याभावसजातीयएवेत्यव्याप्तितादवस्थ्यमतआह। साजात्यंचेति। यद्यपिसाध्याभावनिरूपितसमानाधिकरणधर्माव
च्छिन्नप्रतियोगिताकत्वव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपंतेनैवरूपेणसाजात्यंवाच्यं। तथाचवह्निसामान्याभाव राम॰
निष्ठप्रतियोगिताकत्वान्यतररूपंवह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वस्वरूपंतस्यनिर्वह्निवृत्तित्वसामान्याभावादावसत्वादसंभवः। त ३८
थापियावंतः समानाधिकरणधर्मावच्छिन्नाभावास्तावदन्यतमत्वतद्वृत्तित्वाद्यन्यतररूपेणसाजात्यंवाच्यमित्याशयः। समनियताभावे

वमात्रगगनाभाववद्वृत्तिखिलव्यधिकरणधर्मावच्छिन्नाभावइतिमतेतुगगनाभावत्वतदन्यत्वान्यतरत्वेनसाजात्यंवाच्यं।तेनघटत्वेननिर्धू
मवत्त्वाभावस्यैवगगनत्वादिसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकतयाधूमसामान्याभावसजातीयत्वेपिव्याप्तिः।साध्याभा व्याति २
वश्चेति।साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावो साध्याभावपदेनउक्तइत्यर्थः।साध्यव्यापकता ३२
वच्छेदकप्रतियोगिताकत्वरूपप्रथमदलस्यैघटत्वविशिष्टवाय्वत्वाद्यभावस्यापिसाध्याभावपदार्थतयातत्सजातीयस्यतद्घक
णावृत्तित्वाभावस्यहेतावसत्वादसंभवस्यादतस्तत्परित्यागः॥ अत्रसाध्यव्यापकतावच्छेदकसंबंधेनसाध्यव्यापकस्याभावोग्राह्यः
तेनएकसंबंधेनसाध्यव्यापकस्यसंबंधांतरावच्छिन्नसाध्याभाववतिहेतोर्वृत्तौअपिनक्षतिः॥ यत्तुसाध्यतावच्छेदकसंबंधेनै
वसाध्यव्यापकत्वंतेनैवसाध्यव्यापकाभावोनिवेश्यइतिमतंतत्तुच्छं। यत्रतादात्म्येनप्रमेयमात्रंसाध्यंतत्रतेनसंबंधेनसाध्य
व्यापकतावच्छेदकप्रमेयत्वादिकंतादात्म्येनतदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्यातत्रसद्धेतावव्याप्तेः।प्रमेयत्वेनघटपटोभय
मेयस्वीकारेणाकथंचिदव्याप्तिवारणेपितादात्म्यनियामकसंबंधेनसाध्यतायामव्याप्तिः।साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिता
प्रसिद्धेः।किंचैवंधूमवान्वह्नेरित्यादावतिव्याप्तिः।संयोगेनधूमसामान्याभावस्याव्याप्यवृत्तितयाधूमत्वेनघटाभावस्यैवतादृशतया

शि.टी.जा.

३९

यावदंतर्गतत्वेन तत्सजातीयस्य तदधिकरणावृत्तित्वाभावस्य वन्हौ सत्वात्। अस्माकं तु स्वरूपसंबंधेनायःपिंडभेदस्यापि धूमव्यापकतया याव
न्हिसत्वभाववद्वृत्तित्वान्नातिव्याप्तिरिति ध्येयं। ननु कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः कपिसंयोगसामान्याभावस्यापि प्रति
योगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकतया यावदंतर्गतत्वस्य तत्सजातीयस्य तदधिक
रणावृत्तित्वाभावस्य हेतावसत्वादत आह। व्याप्यवृत्तिश्चेति। व्याप्यवृत्तित्वसावच्छिन्नवृत्तिकान्यत्वं। संयोगिसत्वादिस्वरूपं तु द्रव्य
त्वादिसामान्याभावस्यापि साध्याभाववत्तया हेतोस्तदधिकरणावृत्तित्वाभावस्य हेतावसत्वात्तत्राह। व्याप्यवृत्तिश्चेति। व्याप्य
वृत्तित्वं सावच्छिन्नवृत्तिका[illegible]देव नातिव्याप्तिः। ननु स्पर्शवान् पृथिवीत्वादित्यादावव्याप्तिः रूपत्वेन नित्यसमवेताभावस्यापि निरुक्तसा याव
लो ४ ध्याभावं[illegible]यावदंतर्गतत्वस्य तत्सजातीयस्य तदधिकरणावृत्तित्वसामान्याभावस्य हेतावसत्वात्। सामान्यधर्मेणाविशेषाभाववत्स्वीकारे
प्य ३ तद्रूपत्वेन तद्रूपाभावमादायोक्ताव्याप्तिरत आह। प्रतियोगितावच्छेदकेत्यादि। प्रतियोगितावच्छेदकावच्छिन्नेति प्रयोगिव्यधिकरणत्वं
प्रतियोगिताके अभावे स्वावच्छेदकसंबंधेन स्वसमानाधिकरणस्वावच्छेदकावच्छिन्नसामानाधिकरण्यं तदस्य प्रतियोगिता राम
[illegible]। बोध्यं तेन नित्यरूपात्मकेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनासामानाधिकरण्यविरहेपि उक्ताभावस्य न संग्रहः। नव ३९

घ

तद२ त्मकस्यैव साध्याभावस्य समवेतसा ३

वाच्यत्वेन प्रमेयत्वाभावस्य ज्ञेयत्वत्वेन वाच्यत्वाद्यभाववत्त्वाव्यधिकरणधर्मावच्छिन्नाभावमात्रस्यैव साध्याभावस्य प्रतियोगिता
वच्छेदकावच्छिन्नप्रतियोगिसमानाधिकरणत्वेपि संग्रहः। अत्र च निरुक्तानुयोगितदन्यप्रतियोगिता
एवसंग्रह ३ ...व्यापकतावच्छेदकरूपावच्छिन्नत्वं बोध्यं। तेन कपिसंयोगाभावसमवेतसामान्याभावनिष्ठनिरुक्तप
तियोगिताकत्वस्य कपिसंयोगाभावत्वरूपसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वयोः सत्वेपि कपिसंयोगाभाव
वान् वाच्यत्वादित्यादौ रूपत्वेन नित्यसमवेताभावस्यैव नित्यरूपसामान्याभावतया तत्र नित्यरूपत्वावच्छिन्ननिरुक्तप्रतियोगि
ताकत्वसाध्यव्यापकतावच्छेदकीभूतरूपत्वावच्छिन्नप्रतियोगिताकत्वयोः सत्वेपि रूपवान् पृथिवीत्वादित्यादौ नाव्याप्तिः। नि
त्यरूपत्वे समवेतसामान्याभावत्वावच्छिन्नप्रतियोगितायाः साध्यव्यापकतावच्छेदकरूपानवच्छेद्यत्वादिति ध्येयं। द्वितीयदी
स्याप्रवेशस्य फलमाह। तन्नत्साध्यव्यक्तेरिति। अभाववत्तित्वस्यापि हेतोर्नाव्याप्तिरित्यन्वयः। वृत्तित्वादेः फलमाह। व्यक्ती य
व्यवृत्तेर्वा साध्यस्येति। तन्नत्साध्याभावेत्यादि। सामान्यतः साध्याभाववद्वृत्तित्वव्यापकत्वोक्तौ वह्निसामान्याभावसजातीयस्य व्य
